# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-6)** **प्रश्नपत्रम् – 7** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C.E.3.6.11** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –05/04/2019 सन्दर्भग्रन्थः – भागवते नवमस्कन्धः / मार्कण्डेयपुराणे ७९ तः ९१ अध्यायाः

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या।** **10**

(1) स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये॥

(2) ये दारागारपुत्राप्तान् प्राणान्वित्तमित्तं परम्।
हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे॥

(3) दुष्करः को नु साधूनां दुस्त्यजो वा महात्मनाम्।
यैः सङ्गृहीतो भगवान् सात्वतामृषभो हरिः॥

**प्रश्नः-2 च्यवनसुकन्ययोः चरित्रं विलिख्य अम्बरीषकथां लिखत।** **10**

**अथवा**

**श्रीमद्भावतपुराणाश्रितां रामायणकथां लिखत।**

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या।** **10**

(1) उत्तमश्चिन्तितं कुर्यात्प्रोक्तकारी तु मध्यमः।
अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः॥

(2) यदा न कुरुते भावं सर्वभूतेष्वमङ्गलम्।
समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः॥

(3) जातो गतः पितृगृहाद्व्रजमेधितार्थो हत्वा रिपून् सुतशतानि कृतोरुदारः।
उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे आत्मानमात्मनिगमं प्रथमञ्जनेषु॥

**प्रश्नः-4 परशुरामकथां विलिख्य ययातिचरित्रं वर्णयत।** **10**

**अथवा**

**दुष्यन्तरन्तिदेवयोः कथान्ते यदुवंशवर्णनं कुरुत।**

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 कयोरपि द्वयोः श्लोकयोः ससन्दर्भ प्रसङ्गं व्याख्या कार्या। 10**

(1) हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा।
सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ।।

(2) विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम्।
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः ।।

(3) यो मां जयति जयति संग्रामे यो मे दर्पं व्यपोहति।
यो मे प्रतिकलो लोके स मे भर्ता भविष्यति ।।

**प्रश्नः-6 मधुकैटभवधप्रसङ्गं विलिख्य इन्द्रादिदेवैः कृतां स्तुतिं वर्णयत।**

**अथवा**

**शुम्भनिशुम्भयोः वधं विलिख्य देव्याः स्तुतिंलिखत।**

### अन्वितयः १-३

**प्रश्नः-7 दशानां प्रश्नानां लघूत्तराणि लिखत। 10**

(1) नवमस्कन्धस्य लीलायाः नाम किम्?
(2) नवमस्कन्धे कति अध्यायाः?
(3) मार्कण्डेयपुराणे कति श्लोकाः?
(4) परशुरामस्य मातुः नाम किम्?
(5) दुर्वासाशब्दे षष्ठी एकवचनं किम्?
(6) मान्धातुः ज्येष्ठपुत्रः कः?
(7) हरिश्चन्द्रस्य पितुः नाम किम्?
(8) भगीरथः कस्य पुत्रः?
(9) लक्ष्मणस्य द्वयोः पुत्रयोः नाम किम्?
(10) तक्षः एवं पुष्कलः कस्य पुत्रौ?
(11) शत्रुघ्नस्य कति पुत्राः?
(12) चण्डमुण्डयोः वधेन देव्याः नाम किमभवत्?
(13) मार्कण्डेय शब्दस्य विग्रहः किं भवति?
(14) चन्द्रस्य पुत्रः कः?
(15) शोणितम् अर्थात् किम्?